ज्वरितस्य वर्ज्यावर्ज्यानि भावप्र० उक्तानि यथा "सामान्यतो ज्वरी पूर्वं निवाते निलये वसेत्। निवातमायुषो वृद्धिमारोग्यं कुरुते यतः। व्यजनस्यानिलस्तृष्णास्वेदमूर्च्छाश्रमापहः। तालवृन्तभवो वातस्त्रिदोषशमनो मतः। वंशव्यजनजः सोष्णो रक्तपित्तप्रकोपनः। चामरो वस्त्रसंभूतो मायूरो वेत्रजस्तथा। एते दोषजिता वाताः स्निग्धा हृद्याः सुपूजिताः। नवज्वरी भवेद्यत्नाद्गुरूष्णवसनावृतः। यथर्तु पक्वपानीयं पिबेत् किञ्चिन्निवारयन्। विनापि भेषजैर्व्याधिः पथ्यादेव निवर्त्तते। न तु पथ्यविहीनस्य भेषजानां शतैरपि। ततो ज्वरे वर्जनीयान्याह सुश्रुतः "परिषेकान् प्रदेहांश्च स्नेहान् संशोधनानि च। दिवास्वप्नं व्यवायञ्च व्यायामं शिशिरं जलम्। क्रोधप्रवातभोज्यांश्च वर्जयेत्तरुणज्वरी"। परिषेकः स्नानादिः, प्रदेहोऽनुलेपनाभ्यङ्गादिः। परिषेकादिसेवने दोषमाह तत्रैव

"शोषं छर्दिं मदं मूर्च्छां भ्रमं तृष्णामरोचकम्। प्राप्नोत्युपद्रवानेतान् परिषेकादिसेवनात्"। आदिशब्देन प्रदेहादयो गृह्यन्ते। हारीतेन प्रत्येकं सेवने फलमुक्तञ्च "व्यायामज्ज्वरसंवृद्धिर्व्यवायात् स्तम्भमूर्च्छनम्। स्मृतिश्च स्नेहपानाद्यैर्मूर्च्छा छर्दिर्मदोऽरुचिः। गुर्वन्नभोजनात् स्वप्नाद्दिवास्वापाद्दोषकोपनम्। अग्निसादः खरत्वञ्च स्रोतसां च प्रवर्तनम्"। स्मृतिरिति व्यवायादित्यत्र संबध्यते। स्वप्नात् दिवास्वापात्, ज्वरमुक्तावपि वर्ज्यमाह। "सज्वरो ज्वरमुक्तो वा विदाहीनि गुरूणि च। असात्म्यान्यन्नानि पानानि विरुद्धाध्यशनानि च। व्यायाममतिचेष्टां वाऽभ्यङ्गं स्नानञ्च वर्जयेत्। तेन ज्वरः शमं याति शान्तश्च न पुनर्भवेत्"। ज्वरी लङ्घनं कुर्य्यादित्याह चरको वाग्भटश्च "आमाशयस्थो हत्वाग्निं सामो मार्गान् पिधापयन्। विदधाति ज्वरं दोषस्तस्माल्लङ्घनमाचरेत्"। तथा "ज्वरादौ लङ्घनं प्रोक्तं ज्वरमध्ये तु पाचनम्। ज्वरान्ते भेषजं दद्याज्ज्वरमुक्ते विरेचनम्। त्रिविधं त्रिविधे दोषे तत्समीक्ष्य प्रयोजयेत्। दोषेऽपि लङ्घनं पथ्यं मध्ये लङ्घनपाचनम्। प्रभूते शोभनं तस्य मूलादुन्मूलयेन्मलान्"। चक्रदत्तश्च "तरुणं तु ज्वरं पूर्वं लङ्घनेन क्षयं नयेत्। आमदोषमलिङ्गाद्वा लङ्घयेत्तं यथाविधि,। अन्यच्च "वातः पचति सप्ताहात् पित्तं तु दशभिर्दिनैः। श्लेष्मा द्वादशभिर्घस्रैः पच्यते वदतां वर!।"लङ्घनं लङ्घनीयस्तु कुर्य्याद्दोषानुरूपतः। त्रिरात्रमेकरात्रं वाऽहोरात्रमथ वा ज्वरे। निवातसेवनात् स्वेदाल्लङ्घनादुष्णवारिणः। पानादामज्वरे क्षीणे पश्चादौषधमाचरेत्"। आत्रेयेणोक्तम् "ज्वरादौ लङ्घनं प्रोक्तं ज्वरमध्ये तु पाचनम्। ज्वरान्ते भेषजं दद्याज्ज्वरमुक्ते विरेचनम्। दोषशेषस्य पाकार्थमग्नेः सन्धुक्षणाय च। लङ्घितस्याथ्यदोषश्चेत् यवागूपानमाचरेत्। शालिषष्टिकमुद्गानां यूषं वा शस्तमाचरेत्। पञ्चकोलेन संसिद्धां यवागूं मध्यलङ्घने। अत्यर्थं लङ्घितं दृष्ट्वा तस्य सन्तर्पणं हितम्। द्राक्षादाड़िमखर्ज्जूरपियालैः सपरूषकैः। तर्पणार्हस्य कर्तव्यन्तर्पणं ज्वरशान्तये"। अत्र लङ्घनशब्देनानशनमुच्यते। यत आह सुश्रुतः "आनद्धःस्तिमितैर्दोषैर्यावन्तं कालमातुरः। तावत्त्वनशनं कुर्य्यात्ततः संसर्गमाचरेत्"। आनद्धःस्तिमितैर्दोषैः सम्बद्धः। संसर्गं औषधान्नादिप्रसङ्गम्। यत आह चरकः "चतुःप्रकारा संशुद्धिः पिपासा रोधमारुतौ। पाचनान्युपवासश्च व्यायामश्चेति लङ्घनम्। चतुःप्रकारा संशुद्धिर्वमनञ्च विरेचनम्। निरूहणं च वस्तिश्च शिरोविरेचनं तथा। नत्वनुवासनं कार्य्यं तस्य वृंहणत्वात्। अत्र लङ्घनं कर्शनमित्यर्थः। तथा च सुश्रुतः "शरीरलाघवकरं यद्द्रव्यं कर्म वा पुनः। तं लङ्घनमिति ज्ञेयं वृंहणं तु पृथग्विधम्"। लङ्घनात्कर्शनादन्यत् शरीरपोषकमित्यर्थः। ननु "आनद्धः स्तिमितैर्दोषैरित्यादि पूर्वोक्तसुश्रुतवचनात्सामान्यतो ज्वरिणा यथाऽनशनरूपं लङ्घनं क्रियते। तथा चतुःप्रकारा संशुद्धिः इत्यादि चरकवचनाद्वमनादिरूपं लङ्घनं सर्वैर्ज्वरिभिः कथं न क्रियते। तत्रोच्यते वमनादिकमवस्थाविशेषेषु क्रियते नतु सर्वज्वरेषु तथा च सुश्रुतः "सोत्क्लेशे बलिने देयं वमनं श्लैष्मिकज्वरे। पित्तप्राये विरेकस्तु कार्यः प्रशिथिलाशये। सरुजे नीरुजे कार्य्यं सोदावर्त्ते निरूहणम्। कफाभिपन्ने शिरसि कार्य्यं मूर्द्धविरेचनम्"। अपिच सर्वज्वरिभिः पिपासानिग्रहो न कार्य्यः। यत आह हारीतः। "तृष्णा गरीयसी घोरा सद्यः प्राणविनाशिनी। तस्माद्देयं तृषार्त्ताय पानीयं प्राणधारणम्"। अतोऽवस्थाविशेष एव पिपासासहनं ज्वरिभिर्मारुतसेवनं न कार्य्यम् सुश्रुतेन प्रवातसेवनस्य सर्वथा निषिद्धत्वात्। अतो मारुतसेवनमप्यवस्थाविशेष एव युक्तम्। लङ्घनाम्बुयवागूभिर्यदा दोषो न पच्यते। तदा तु सुखवैरस्यतृष्णारोचकनाशनैः। ज्वरघ्नैः पाचनैर्हृद्यैः